# आध्यात्मिका बुद्धेः विमर्शः

**डॉ. सविता राय**[1]
एस्सिटेंट प्रोफेसर, शिक्षापीठ,
श्रीलाल बहादुर शास्त्री-
राष्ट्रिय संस्कृत विश्वविद्यालय
नई दिल्ली।

**सारांश**

पूर्वस्यां शताब्द्यां बुद्धेः सम्प्रत्ययेषु विशालं परिवर्त्तनम् अभवत्। एतेन परिवर्त्तनेन बुद्धिलब्धेः सम्प्रत्ययेषु अपि परिवर्त्तनं जातम्। वर्त्तमानसमये मनोवैज्ञानिकैः बुद्धिलब्धेः सहैव भावात्मिकलब्धेः आध्यात्मिकलब्धेश्च परिचयं कर्त्तुम्, तयोः समन्वितव्याख्यां कर्त्तुं च प्रयासाः क्रियमाणाः सन्ति। विंशतिशताब्द्या अन्ते आधुनिकपाश्चात्यमनोवैज्ञानिकैः विचारस्य अस्य स्वीकृतिः प्राप्ता, यत् मानवीय बुद्धेः सम्प्रत्ययः तावद् पूर्णतां न भविष्यति यावद् अस्मिन् आध्यात्मिकबुद्धेः सम्प्रत्ययस्य समावेशो न जातः। पत्रे अस्मिन् व्यक्तित्वस्य सर्वाङ्गीणविकासे आध्यात्मिकबुद्धेः वर्णितम् अस्ति।

**मुख्यशब्दाः-** भावात्मकबुद्धिः, आध्यात्मिकबुद्धिः, शैक्षिकबुद्धिः, संज्ञानात्मकक्षमता, आत्माभिज्ञता।

वर्तमाने भावात्मकबुद्धिः समधुरसमयोजनस्य कृते प्रभावी अनुकूलनक्षमता अस्ति चेत् आध्यात्मिकबुद्धिः समस्यायाः अर्थस्य मूल्यस्य तथा अन्तिममौलिकविचारेण सहैव परिचयार्थं तत्समाधानहेतवे च अवगम्यते। शैक्षिक-भावात्मक-आध्यात्मिकबुद्धयः मानवबुद्धेः कठिनसमस्याः प्रस्तुवन्ति। बौद्धिक-शैक्षिकबुद्धी व्यक्तेः संज्ञानात्मकक्षमतां मापनं क्रियेते। परन्तु दैनिकजीवने व्यक्तिः यासां समस्यानां परिस्थितीनां प्रत्यक्षं करोति, तासां भावात्मकपरिस्थितीनां कृते इयं बुद्धिः योग्यता वा व्यक्तिं न्यूनसज्जतां सम्पादयति। अतः यदि व्यक्तेः सम्पूर्णव्यक्तित्वस्य विकासस्य वार्ता भवति चेत् तदा केवलं शैक्षिकयोग्यतायाः बौद्धिकयौग्यतायाः (IQ) ज्ञानं पर्याप्तं नास्ति अपितु आसां त्रयाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धीनां परिज्ञानम् उपयुक्तं भवेत्। अधोवर्णिततालिकायां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः संबध्दितानां विविधपक्षाणां विश्लेषणं लिखितं वर्त्तते।

**सारिणी (i) – बुद्धेः विविधस्वरूपम्**

| **शैक्षिकबुद्धिः** (IQ) | **भावात्मकबुद्धिः** (EQ) | **आध्यात्मिकबुद्धिः** (SQ) |
|---|---|---|
| • तार्किकदृष्टिकोणम्<br>• शांन्तिप्रिय/न्यायपालनम्<br>• प्रायः नियन्त्रणयोग्यम्<br>• एकाकीभावे बलम्<br>• पूर्वकथनीयम्<br>• प्रभुत्वप्रियः | • समायोजनपूर्णं दृष्टिकोणम्<br>• सामञ्जस्यं सहयोगश्च<br>• स्वभावबद्धः नियन्त्रितश्च<br>• परस्परमिलनभावनायां बलम्<br>• अस्पष्टम् | • परिमाणात्मकं दृष्टिकोणम्<br>• पुनः सन्दर्भीकरणम्<br>• अस्तव्यस्तता<br>• एकीकरणम्/समन्वये<br>• बलम् अप्रत्याशितम् |

[1] email- raidrsavita@gmail.com
Contact-9911903939

आध्यात्मिकबुद्धिं परिभाषयितुं अतिकठिनं वर्तते परमत्र एतत्स्पष्टीकर्तुमावश्यकता अस्ति यत् अस्य सम्बन्धः केनापि व्यवस्थितधर्मेण सह नास्ति। आध्यात्मिकबुद्धेः सम्बन्धः जीव-जगतोः सम्बन्धितैः किम्, कथम्, किमर्थम् इत्यादिविविधप्रकारकैः प्रश्नैः सह वर्तते ये व्यक्तिं तर्कस्य चिन्तनस्य हेतवे प्रेरितं कुर्वन्ति। आध्यात्मिकबुद्धेः सर्वोत्कृष्टो गुणः प्रज्ञायुक्तभवनम्। मूल्यम् आदर्शो वा आध्यात्मिकबुद्धेः , साहसः, सत्यनिष्ठा, अन्तर्ज्ञानम्, करुणा, सहानुभूतिः, स्वज्ञानसीमापरिज्ञानम् इत्येते च तस्य आधारभूतगुणाः सन्ति। जीवनस्य परिस्थितिभिः शिक्षणम्, जीवनसम्बद्धप्रश्नकरणम्, परिस्थितेः दूरं गत्वा चिन्तनक्षमता, कस्या अपि परिस्थितेः वादस्य च विषये विशेषदृष्टिकोणस्य तथा सर्वसम्भावनानां प्रति व्यापकदृष्टिकोणस्थापनस्य रूपे अपि आध्यात्मिकबुद्धिं बोद्धुं शक्यते।

आध्यात्मिकबुद्धिः बहुविधबुद्धिषु अन्यतमः। इमां बुद्धिं स्वतन्त्ररूपेण विकासयितुं शक्यते। इयं बुद्धिः बाह्यजगत् साकं मनसः बुद्धेः अर्थात् आन्तरिकमानसिकजगतः एकीकरणे बलं ददाति। इमां तर्क-अनुसन्धान-अभ्यासैः विकासं कर्तुं शक्यते। व्यक्तेः आध्यात्मिकानुभवः अस्यां योगदानं कर्तुं शक्नुवन्ति परन्तु अयं सन्दर्भस्य (विषयगतस्य) एकीकरणस्य च साधनेषु आश्रितो भवति। पूर्णमानसिकशारीरिकस्वास्थ्यस्य च कृते आध्यात्मिकज्ञानम् आवश्यकं यत् स्वस्थव्यक्तित्वस्य विकासहेतवे आध्यात्मिकविकल्पानाम् अर्थात् स्वेन सह समाजस्य कृते कल्याणकरं भवेत्, तेषां चयने सहायतां करोति। अब्राहम-मॉस्लो (1954)महोदयेन स्वस्य हायरेरकी ऑफ नीड्स (Hhierarchy of Needs) पुस्तके उक्तं यत् यथा व्यक्तिः आत्मभिज्ञतायाः(self-actualization) श्रेष्ठतायाः (Transcendence) स्थितिं प्राप्नोति तथा सः अधिकप्रौढः बुद्धिमान् च भवति।[i] आत्माभिज्ञता आत्मसाक्षात्कारस्य सर्वोच्चस्थितिः अस्ति। अस्यां स्थितौ प्राप्तये आध्यात्मिकबुद्धेः महत्त्वपूर्णं योगदानं भवति। डेनियल (2001)[ii] महोदयेन परामर्शः प्रदत्तो यत् मॉसलोमहोदयस्य अन्तिमो निष्कर्षो यत् आत्माभिज्ञता (Self-Actualization) व्यक्तेः व्यवहारे दृष्टिपथं भवति, मानवव्यवहारस्य अभिप्रेरणायाः अध्ययने तस्य एकं महत्त्वपूर्णं योगदानम् अस्ति। बुद्धिः व्यक्तेः व्यवहारस्यैव एकम् अङ्गं भवति अतः बुद्धेः अध्ययने अपि इमं सिद्धान्तं गण्यते। आत्मभिज्ञता (Self-Actualization) व्यक्तेः आन्तरिकयोग्यताभिः ज्ञान-अभिवृत्ति-कौशलप्रभृतिभिः सह सम्बद्धा भवति तदा श्रेष्ठता (Transcendence) अन्येषु दक्षतायाः योग्यतायाः विकासे सहयोगरूपेण अज्ञातेन सम्बन्धरूपेण च प्रकटितं भवति। आध्यात्मिकबुद्धिं कस्यापि व्यक्तेः आत्मा अथवा स्वं बुद्ध्वा मानवीयमूल्यानां कृते उच्चस्तरीयविवेकशीलतायाः करुणायाः प्रतिबद्धतायाः सह जीवने सामाजिकरूपेण प्रासंगिकोद्देश्यस्थापनस्य क्षमतायाः रूपेण बोद्धुं शक्यते। इयं बुद्धिः व्यक्तेः शैक्षिकस्य भावात्मकबुद्धेः च (ज्ञानम्, प्रशंसा, जनसम्बन्धः, सहानुभूतिः इत्यादि) विकासस्य सह वर्धते। सामान्या शैक्षिकी वा बुद्धिः संवेगात्मिका च बुद्धिः यत्र आध्यात्मिकबुद्धेश्च अस्तित्वरूपेण स्थापनस्य कारणं भवति तत्र आध्यात्मिकबुद्ध्या शैक्षिकबुद्धेः संवेगात्मकबुद्धेश्च उचितविकासस्य कल्याणकारिप्रयोगहेतवे उचितमार्गं प्रशस्तयति। शैक्षिकबुद्धिः अस्मान् शीघ्रतया चिन्तने, भावात्मकबुद्धिः सम्बन्धनिर्माणे, आध्यात्मिकबुद्धिः अनयोः द्वयोः कार्ययोः शीघ्रतया सम्पादने सामञ्जस्यं स्थापयति। आध्यात्मिकबुद्धिः आन्तरिकज्ञानं गभीरावबोधनम् च विकासयति। शिक्षायां मनोविज्ञाने च मानसिकशक्तीनां तासां मापनावधारणायां कोऽपि नवीनः विषयो नास्ति परन्तु आध्यात्मिकबुद्धिं शिक्षाजगते कतिपयनवीनसम्प्रत्ययरूपेण अवबोद्धुं शक्यते।

आध्यात्मिकबुद्धिः उच्चार्थानां, मूल्यानां, उद्देश्यानां, स्वाचेतनविषयाणां पर्यन्तं प्रापणस्य तथा च अर्थान्, मूल्यानि, उद्देश्यान् च जीवने समृद्धरूपेण रचनात्मकरूपेण च क्रियान्वयनस्य क्षमता अस्ति। विशिष्टप्रकारेण चिन्तनयोग्यता, विनम्रता, अनहंभावः, अहम्भावात् ममत्वभावात् अतिरिच्य चिन्तनस्य योग्यता एव उच्चाध्यात्मिकयोग्यतायाः द्योतकः अस्ति। वयं कश्मिंश्चिदपि बिन्दौ तदुच्चाहम्भावस्य (Higher self ) सम्पर्के आगच्छामः। अस्माकं ज्ञानेन्द्रियेभ्यः पारं चिन्तनस्य, अवबोधनस्य, कार्यकरणस्य च योग्यताः आध्यात्मिकबुद्धिः इत्युच्यते। व्यक्तौ कियती आत्माभिज्ञता अस्ति तथा सः तस्य कथमुपयोगः करोति, एतत् तस्याध्यात्मिकबुद्धौ आश्रितो भवति। आध्यात्मिकबुद्धेः सम्बन्धः केनापि धर्मेण न भवति अपितु व्यक्तेः उच्चचिन्तनेन सह भवति। अस्याः सम्बन्धः व्यक्तेः अन्यव्यक्तीः अन्यसजीवप्राणिनो वा प्रति सम्बन्धेन भवति। एतादृशी व्यक्तिः, अस्मान् या जगत् दृश्यते अथवा न दृश्यते, तस्याः प्रत्यपि सचेतनं भूय तिष्ठति तथा अन्येषां भावनाः प्रति स्वानुभूतिं धारयति। व्यक्तौ आध्यात्मिकी परिपक्वता, तस्य ज्ञानेन सहजसहयोगात्मकस्वभावेन च व्याक्ता भवति। बुद्धिरियं जन्मजातान्तरिकगुणान्, पारदर्शिचिन्तनानि, कार्याणि, अभिवृत्तीश्च प्रकटयितुं समर्था भवति। आत्मभिज्ञतायाः सन्दर्भे प्रत्येको व्यक्तिः स्वभौतिकास्तित्वे रूपे वा विश्वसिति। तथा अस्मिन्नेव रूपे तं ज्ञायते। स्वविषये विपरीतावबोधः, स्वास्तित्वनिरूपणाय सङ्घर्षः व्यक्तेः जीवने भयम्, क्रोधः, दुःखं च उत्पादयति। आध्यात्मिकदृष्ट्या एताः भावनाः अहम्भावस्य प्रतीकाः याः व्यक्तेः आध्यात्मिकप्रकृतिम् अर्थात् शान्तिः, प्रेम, सहयोगः इत्यादीन् अवरोधयन्ति। आध्यात्मिकी बुद्धिः व्यक्तिम् उचितसमयस्य, उचितस्थानस्य, उचितभावनायाः सह उचितनिर्णयग्रहणे सहायिका भवति। अध्यात्मशास्त्रशोधसंस्थानस्य (Spiritual Science Research Foundation) अनुसारम् अध्यात्मशब्दः तान् सर्वान् घटकान् परिभाषयति ये अस्माकं पञ्चज्ञानेन्द्रिय-मनो(अर्थात् सम्वेदनाः, भावनाः, इच्छाश्च)-बुद्धिभ्यः(अर्थात् निर्णयप्रक्रिया तथा तर्कक्षमता) परं वर्तते। अतः उच्यते यत् आध्यात्मिकी बुद्धिः विवेकेन करुणया च सह व्यावहारे आन्तरिक-बाह्यशान्तीः स्थापनक्षमता अस्ति।[iii]

डानाजोहर-मार्शलमहोदययोरनुसारम्- आध्यात्मिकबुद्धेरर्थः केवलायाः धार्मिकतायाः ओतप्रोतभवनमेव नास्ति। इयं तु मानवमस्तिष्क-मनः-आत्मनाम् आन्तरिकयोग्यता क्षमता चास्ति। आध्यात्मिकबुद्धिरेव सा बुद्धिः या वयं कानि?, किमर्थं स्मः?, अस्माकं जीवनलक्ष्यं किम्?, तस्य च जीवनस्य आदर्शः मूल्यं च किम्? इत्यादिप्रश्नानाम् उत्तरान्वेषणे प्रवृत्ता भवति। एषा सैव बुद्धिः या अस्माकं संज्ञानात्मिकां संवेगात्मिकां च बुद्धिम् एकम् उचितप्रकारस्य दशा दिशा च प्रदाय तयोः सर्वोत्तमोपयोगाय अस्माकं साहाय्यं विदधाति। यस्मात् वयं स्वप्रतिभाभिः स्वस्य परेषां च जीवनम् आनन्दमयं कर्तुं शक्नुमः। इयं बुद्धिः सार्वभौमिकी भवति अर्थात् कस्याः अपि जातेः, धर्मानुयायिनः, लिङ्गस्य च व्यक्तिषु उपलभ्यते। डानाजोहरमहोदयेन 1997तमे वर्षे स्वपुस्तके "रि राइटिंग दि कॉरपोरेट ब्रेन" इत्यत्र आध्यात्मिकबुद्धिशब्दः प्रस्तुतः।[iv] तेन आध्यात्मिकबुद्धेरन्तर्निहिताः 12 सिद्धान्ताः परिभाषिताः।[v]

1. आत्मभिज्ञता (Self-awareness) : अहं कस्मिन् विश्वासं करोमि, किं करोमि येन अहं कां प्रेरणां प्राप्नोमि।
2. सहजता (Spontaneity): वर्तमाने स्थितो वर्तमानक्षणस्य कृते उत्तरदायित्वभवनम्।
3. व्यापकदृष्टिस्थापनम् मूल्यनेतृत्वञ्च (Being vision and value-led) : सिद्धान्तानां गभीरमान्यतानाम् अनुसारं कार्यसम्पादनम्, तदनुसारं जीवनयापनञ्च।

4. पवित्रता(Holism): बृहत्प्रतीकानां (patters) सम्बन्धानां (relationships) संयोजनानां (conncetions) दर्शनम् स्वत्वभावस्थापनञ्च।
5. करुणा (Compassion): अनुभूतेः साकं गभीरसहानूभूतेः गुणस्य भवनम्।
6. विविधतायाः उत्सवः (Celebration of diversity) : मतभेदानां सत्त्वेऽपि अन्यजनानां महत्त्वप्रदानम्।
7. क्षेत्रस्य स्वतन्त्रता (Field independence): जनसम्मर्दस्य विरुद्धम् उत्थानम्, स्वस्य प्रति प्रतिबद्धताभवनम्।
8. विनम्रता (Humility): संसारस्य नाटके अभिनयकर्तृत्वस्य सत्स्थाने भवनस्य च भावना।
9. मौलिकम् (Tendency to ask fundamental "Why" questions): वस्तूनाम् ज्ञानम् तेषां मूलस्तरपर्यन्तं ज्ञानञ्च।
10. खण्डनस्य क्षमता (Ability to reframe) कस्या अपि स्थितेः समस्यायाश्च अपसरणम्, बृहत्-चित्रस्य व्यापकसन्दर्भस्य च दर्शनम्। Standing back from a situation of problem and seeing the bigger picture or wider context.
11. प्रतिकूलतायाः सकारकत्मकोपयोगः (Positive use of adversity) दोषैः असफलताभिः दुःखैश्च शिक्षणम् उत्तरगमनञ्च।
12. सम्वेदनायाः भावः (Sense of vocation) : कस्मैचित् प्रत्यर्पणाय सेवायै आह्वानम्। Feeling called upon to serve, to give something back.

अन्ते तावत् वक्तुं शक्यते यत् शिक्षाक्षेत्रे बौद्धिकविकासे अधिकं बलं प्रदीयते। परन्तु यदि व्यक्तित्वस्य सर्वाङ्गीणविकासस्य वार्त्ता क्रियते तदा केवलस्य संज्ञानात्मकस्य भावात्मकस्य वा पक्षस्य एव न अपितु आध्यात्मिकपक्षस्य विकासोऽपि आवश्यकः। वर्तमानसमये सर्वत्र अशान्तिः स्वार्थपरतायाश्च भावनायाः विकासो दृश्यते। समाजस्य प्रत्येकं समुदायः- शिक्षकः, छात्रः, अन्यो वा जनः भवेत् ते सर्वेऽपि समस्याग्रस्ताः सन्ति। एषां समस्यानां प्रभावेण शान्तिपूर्वेण च निराकर्त्तुम् आध्यात्मिकबुद्धेः विकासे बलप्रदानस्य आवश्यकता अस्ति। अनया न केवलं स्वमनःशान्तिं सुनिश्चितं कर्तुं शक्यते अपितु सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः इति संकल्पनायाः सिद्धिमपि कर्तुं शक्यते। एकस्य शिक्षकस्य व्यक्तित्वे यदि एतेषां समेषां पक्षाणां विकासो भवेत् तदा सः एतादृशान् छात्रान् निर्माति यत् "यत्र विश्वं भवत्येकनीडम्"इतिसंकल्पनायाः साकारं कृत्वा विश्वस्मिन् शान्तिं स्थापयितुं कर्तुं शक्यते।

## संदर्भ ग्रंथ सूची


- विद्यालंकार, जगदीश, भारतीय मनोविज्ञान, राधा पब्लिकेशन, नई दिल्ली।
- सक्सेना, ए. के. (2005), शिक्षा में अनुसन्धान, पॉइन्टर पब्लिशर्स, जयपुर, राजस्थान।
- सिंह, अरूणकुमार,(2006) उच्चतर शिक्षा मनोविज्ञान, मोतीलाल बनारसीदास प्रकाशन।
- शुक्ला, लक्ष्मी, (2005) भारतीय मनोविज्ञान, ईस्टर्न बुक लिंकर्स, दिल्ली।
- शुक्ल, बदरीनाथ, (1979), वेदान्तसार, मोतीलाल बनारसीदास प्रकाशन।
- शंकराचार्य, विवेकचूड़ामणि, गीताप्रेस, गोरखपुर।
- पाण्येय, के. पी. (2007), नवीन शिक्षा मनोविज्ञान, विश्वविद्यालय प्रकाशन, वाराणसी।
- पाल, हंसराज, (2006), प्रगतशिक्षा मनोविज्ञान, हिन्दी माध्यम कार्यान्वयन निदेशालय, दिल्ली विश्वविद्यालय।

- Emmons A. R. (2000) **Spirituality and Intelligence: Problems and Prospects**, The international journal for the psychology of religion, 10(1), 7–64
- Zohar, Dana, (1997), Rewiring the Corporate Brain, Berrett-Koehler Publishers, Oakland.


## वेबसंदर्भ%


- https://www.researchgate.net/publication
- https://www.sciencedirect.com
- https://shodhganga.inflibnet.ac.in/bitstream/10603/20767/1/thesis.pdf
- https://pdfs.semanticscholar.org
- https://www.spiritualresearchfoundation.org


---

[i] https://en.wikipedia.org/wiki/Maslow%27s_hierarchy_of_needs

[ii] http://www.mdani.demon.co.uk/archive/MDMaslow

[iii] https://www.spiritualresearchfoundation.org
[iv]https://en.wikipedia.org/wiki/Spiritual_intelligence

[v]https://www.learning-mind.com/spiritual-intelligence-signs/